# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय २९

ततस्तमसि सञ्जाते राक्षसा दैवतैः सह ।
अयुध्यन्त बलोन्मत्ताः सूदयन्तः परस्परम् ॥ १॥

ततस्तु देवसैन्येन राक्षसानां महद्बलम् ।
दशांशं स्थापितं युद्धे शेषं नीतं यमक्षयम् ॥ २॥

तस्मिंस्तु तमसा नद्धे सर्वे ते देवराक्षसाः ।
अन्योन्यं नाभ्यजानन्त युध्यमानाः परस्परम् ॥ ३॥

इन्द्रश्च रावणश्चैव रावणिश्च महाबलः ।
तस्मिंस्तमोजालवृते मोहमीयुर्न ते त्रयः ॥ ४॥

स तु दृष्ट्वा बलं सर्वं निहतं रावणो रणे ।
क्रोधमभ्यागमत्तीव्रं महानादं च मुक्तवान् ॥ ५॥

क्रोधात्सूतं च दुर्धर्षः स्यन्दनस्थमुवाच ह ।
परसैन्यस्य मध्येन यावदन्तं नयस्व माम् ॥ ६॥

अद्यैतांस्त्रिदशान्सर्वान्विक्रमैः समरे स्वयम् ।
नानाशस्त्रैर्महासारैर्नाशयामि नभस्तलात् ॥ ७॥

अहमिन्द्रं वधिष्यामि वरुणं धनदं यमम् ।
त्रिदशान्विनिहत्याशु स्वयं स्थास्याम्यथोपरि ॥ ८॥

विषादो न च कर्तव्यः शीघ्रं वाहय मे रथम् ।
द्विः खलु त्वां ब्रवीम्यद्य यावदन्तं नयस्व माम् ॥ ९॥

अयं स नन्दनोद्देशो यत्र वर्तामहे वयम् ।
नय मामद्य तत्र त्वमुदयो यत्र पर्वतः ॥ १०॥

तस्य तद्वचनं श्रुत्वा तुरगान्स मनोजवान् ।
आदिदेशाथ शत्रूणां मध्येनैव च सारथिः ॥ ११॥

तस्य तं निश्चयं ज्ञात्वा शक्रो देवेश्वरस्तदा ।
रथस्थः समरस्थांस्तान्देवान्वाक्यमथाब्रवीत् ॥ १२॥

सुराः शृणुत मद्वाक्यं यत्तावन्मम रोचते ।
जीवन्नेव दशग्रीवः साधु रक्षो निगृह्यताम् ॥ १३॥

एष ह्यतिबलः सैन्ये रथेन पवनौजसा ।
गमिष्यति प्रवृद्धोर्मिः समुद्र इव पर्वणि ॥ १४॥

न ह्येष हन्तुं शक्योऽद्य वरदानात्सुनिर्भयः ।
तद्ग्रहीष्यामहे रथो यत्ता भवत संयुगे ॥ १५॥

यथा बलिं निगृह्यैतत्त्रैलोक्यं भुज्यते मया ।
एवमेतस्य पापस्य निग्रहो मम रोचते ॥ १६॥

ततोऽन्यं देशमास्थाय शक्रः सन्त्यज्य रावणम् ।
अयुध्यत महातेजा राक्षसान्नाशयन्रणे ॥ १७॥

उत्तरेण दशग्रीवः प्रविवेशानिवर्तितः ।
दक्षिणेन तु पार्श्वेन प्रविवेश शतक्रतुः ॥ १८॥

ततः स योजनशतं प्रविष्टो राक्षसाधिपः ।
देवतानां बलं कृत्स्नं शरवर्षैरवाकिरत् ॥ १९॥

ततः शक्रो निरीक्ष्याथ प्रविष्टं तं बलं स्वकम् ।
न्यवर्तयदसम्भ्रान्तः समावृत्य दशाननम् ॥ २०॥

एतस्मिन्नन्तरे नादो मुक्तो दानवराक्षसैः ।
हा हताः स्मेति तं दृष्ट्वा ग्रस्तं शक्रेण रावणम् ॥ २१॥

ततो रथं समारुह्य रावणिः क्रोधमूर्छितः ।
तत्सैन्यमतिसङ्क्रुद्धः प्रविवेश सुदारुणम् ॥ २२॥

स तां प्रविश्य मायां तु दत्तां गोपतिना पुरा ।
अदृश्यः सर्वभूतानां तत्सन्यं समवाकिरत् ॥ २३॥

ततः स देवान्सन्त्यज्य शक्रमेवाभ्ययाद्द्रुतम् ।
महेन्द्रश्च महातेजा न ददर्श सुतं रिपोः ॥ २४॥

स मातलिं हयांश्चैव ताडयित्वा शरोत्तमैः ।
महेन्द्रं बाणवर्षेण शीघ्रहस्तो ह्यवाकिरत् ॥ २५॥

ततः शक्रो रथं त्यक्त्व विसृज्य च स मातलिम् ।

ऐरावतं समारुह्य मृगयामास रावणिम् ॥ २६॥

स तु माया बलाद्रक्षः सङ्ग्रामे नाभ्यदृश्यत ।
किरमाणः शरौघेन महेन्द्रममितौजसं ॥ २७॥

स तं यदा परिश्रान्तमिन्द्रं मेनेऽथ रावणिः ।
तदैनं मायया बद्ध्वा स्वसैन्यमभितोऽनयत् ॥ २८॥

तं दृष्ट्वाथ बलात्तस्मिन्मायायापहृतं रणे ।
महेन्द्रममराः सर्वे किं न्वेतदिति चुक्रुशुः ।
न हि दृश्यति विद्यावान्मायया येन नीयते ॥ २९॥

एतस्मिन्नन्तरे चापि सर्वे सुरगणास्तदा ।
अभ्यद्रवन्सुसङ्क्रुद्धा रावणं शस्त्रवृष्टिभिः ॥ ३०॥

रावणिस्तु समासाद्य वस्वादित्यमरुद्गणान् ।
न शशाक रणे स्थातुं न योद्धुं शस्त्रपीडितः ॥ ३१॥

तं तु दृष्ट्वा परिश्रान्तं प्रहारैर्जर्जरच्छविम् ।
रावणिः पितरं युद्धेऽदर्शनस्थोऽब्रवीदिदम् ॥ ३२॥

आगच्छ तात गच्छावो निवृत्तं रणकर्म तत् ।
जितं ते विदितं भोऽस्तु स्वस्थो भव गतज्वरः ॥ ३३॥

अयं हि सुरसैन्यस्य त्रैलोक्यस्य च यः प्रभुः ।
स गृहीतो मया शक्रो भग्नमानाः सुराः कृताः ॥ ३४॥

यथेष्टं भुङ्क्ष्व त्रैलोक्यं निगृह्य रिपुमोजसा ।
वृथा ते किं श्रमं कृत्वा युद्धं हि तव निष्फलम् ॥ ३५॥

स दैवतबलात्तस्मान्निवृत्तो रणकर्मणः ।
तच्छ्रुत्वा रावणेर्वाक्यं स्वस्थचेता दशाननः ॥ ३६॥

अथ रणविगतज्वरः प्रभुर्
विजयमवाप्य निशाचराधिपः ।
भवनमभि ततो जगाम हृष्टः
स्वसुतमवाप्य च वाक्यमब्रवीत् ॥ ३७॥

अतिबलसदृशैः पराक्रमैस्तैर्
मम कुलमानविवर्धनं कृतम् ।
यदमरसमविक्रम त्वया
त्रिदशपतिस्त्रिदशाश्च निर्जिताः ॥ ३८॥

त्वरितमुपनयस्व वासवं
नगरमितो व्रज सैन्यसंवृतः ।
अहमपि तव गच्छतो द्रुतं
सह सचिवैरनुयामि पृष्ठतः ॥ ३९॥

अथ स बलवृतः सवाहनस्
त्रिदशपतिं परिगृह्य रावणिः ।
स्वभवनमुपगम्य राक्षसो
मुदितमना विससर्ज राक्षसान् ॥ ४०॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com